## ।। अथ षोडशोऽध्याय: ।। Chapter-16

वसिष्ठ उवाच :-ततो गच्छेन्महाराज तीर्थं पापप्रणाशनम् ।।
दुर्लभं मनुजानां हि कृष्णानामाङ्कितं सर: ।। १

पुरा देवेन दैतेयान् निहत्य जगतीपते ।।
स्वेदबिन्दुपरीतेन यत्रास्नायि मधुद्विषा ।। २

दैत्यास्तटनिक्षेपात् विस्पन्दिरुधिरप्लुतम् ।।
चक्रं प्रक्षालयामास कैटभारिररिंदम ।। ३

नाम्ना कृष्णासरस्तेन गीयते मुनिसत्तमै: ।।
तत्रर्षय: प्रशंसन्ति मधुदानं सपायसम् ।
विप्राय वेदविदुषे दक्षिणां धेनुरूपिणीम् ।। ४

यस्तत्र कुरुते स्नानं राजन्नेकादशीदिने ।
शुक्ले तत्र तु माघस्य पक्षे शुद्धमति: पुमान् ।। ५

सुभुक्त्वा विपुलान् भोगान् भुवि कीर्तिमवाप्य च ।।
स्तूयमान: सुरगणैर्विष्णुलोकं स गच्छति ।। ६

-०-०-०-

ई बी-१- मनुनां, बी २ दैत्यौरस्तटनि:येषनि: स्पंदिरुधिरसंप्लुवे
बी ३ प्रसंस, ई बी ४ णि, ई बी ५ ति:, १ ई रिदंमसुन: , २ ई
मुनिसत्तमै:

(ए) १) तीर्थप्राप

(ए१) तीर्थं प्रापप्रणाशनं

(ए२) देवेन दैत्येयान्

(ए३) पद्मालयामास

(ए४) शुक्लेनतस्मामाघस्य

(ए५) शुद्धमति

(ए) अथ षोडशोऽध्याय:

तदेव कृष्णासर: श्रेष्ठं काकवाराहसेवनात् ।
अद्यापि कीर्त्यते मर्त्यै: काकवाराहसंज्ञया ।। ७

मान्धातोवाच :- कथं कृष्णासरो राजन् काकवाराहतां गतम् ।।
एतदाचक्ष्व सर्वं मे परं कौतूहलं हि तत् ।। ८

वसिष्ठ उवाच :- शृणु राजन् कथां दिव्यां विस्मयानन्दकारिणीम् ।
यां पुरा कथयामास देवर्षि र्मम नारद: ।। ९

आसीत् शतधनुर्नाम धार्मिक: पृथिवीपति: ।
तस्य पत्नी विशालाक्षी नाम्ना शैव्येति विश्रुता।। १०

पतिभक्तिपरा साध्वी महाभागा प्रियंवदा ।। ११

स कदाचित्तया सार्द्धं राजा राजीवलोचन ।।
भागीरथ्या जले स्नातुं कार्तिक्यामगमत्किल ।। १२

मुकुन्दचरणाम्भोजभ्रमरीभूतमानस: ।
ददर्श जलकल्लोलमालिनीमथ जाह्नवीम् ।। १३

-०-०-

ई बी १ लंघत:ई बी २ मम, ई बी ३ आसीतशत, ई बी ४ लमालनी,
१ ई मल्लिल:

(ए १) आसी

(ए २) जान्हवीं

सुधा[1]वत् सुमनोहारि वारिविक्षि[ए1]प्तामुहु: ॥
सारसानां तटस्थानां लोलकल्लोलपाणिभि: ॥ १४

स्वागतं किल जल्पन्तीं मुनिभ्यो हंसकूजितै: ।
सुप्तपंकेरुहव्या[ए2]जाद्बद्धा[2]ञ्जलिमिव स्थिताम् ।। १५
निमग्नं[3] पापकौघे उद्धरन्तीं जगद् बलात् ॥
तामुपेत्य नृप स्नानं चकार स[4]ह शैव्यया ॥ १६

सन्तर्प्य तत्र च पितॄ[ए4]न्देवानभ्यर्च्य भ[5]क्तित: ।
दत्वा दानानि विप्राणामुत्ततार नदीजलात् ॥ १७

आगच्छ[6]ताथ मार्गेण नगरं प्रति भूभुजा ॥
[ए5]एकपारवण्डिना सार्द्धं चक्रे सम्भाषणं नृप ॥ १८

राज्ञी त्वधोमुखीभूयदूरं गत्वा व्यतिष्ठ[7]त ।
तस्य पापस्य संलापाद्विष्णुभक्तोपि भू[8]पति: ॥ १९

----

ई बी १ श्रु। ई बी २ मव, बी ३ पापपकौघ निर्मग्न, ई बी ४ चकारनृप-शैव्यया, ई बी ५ शक्तित:, ई बी ६ च, बी ७ ष्टता, बी ८ भूपति

---

(ए१ ) विक्षेपती

(ए२) न्धा

(ए३) पापपकौघनिमग्नमुद्धरन्तीं जगद बलात् ॥

(ए४) पितरौ

(ए५) तैन

राजन् [1] देहान्तरे सोऽथ विर्योनिं समपद्यत ।
तमन्वगाद्वरारोहा शैव्या प्रेतं नरेश्वर [2] ।। २०

राज्ञी जातिस्मराज्जाता [ए१] विदर्भाधिपतेः गृहे ।
दयितस्य स्मरन्तीसा न वृणोति वरं परम् ।। २१

यत्र यत्र वियौनिस्थं भर्तारं वेत्ति सुन्दरी ।।
तत्रतत्राभिगम्यासौ प्रबोधयति सून्नतः ।। २२

वियौनित्वक्रमेणैव राजा काकत्वमागतः [ए२] ।
आचारी [3] स च पाखण्डी ग्रामसूकरतां गतः ।। २३

अथ तौ नृपशार्दूल [4] समेयातां परस्परम् ।।
श्रीमालं क्षेत्रमासाद्य तत्रापि च सरस्तटे ।। २४

काकोपि भक्ष्यमादाय [ए३] क्रोशन्ती मूषिकां [ए४] नृप ।
काकः [इ१] कृष्णासरस्तीरे न्यग्रोधतरुमाश्रितः ।। २५

-०-०-०-

ई बी १- राजाशतधनुः प्रेत्यविर्यो निसमपद्यत
ई बी २- रं, ई बी ३ अनाचारीसपाषंडीग्राममूकरतांययौ
ई बी ४- सा, १ ई काकः
(ए१) जाता
(ए२) का
(ए३) भक्ष
(ए४) मूशिकां

क्रोशन्ती कम्पमानां तां मूषिकां प्राणशंकया ।।
यावत्काकः पदाक्रम्य हन्ति चंचुपुटेन वै ।। २६

तावत्स घुर्घुराराव कुर्वाणो ग्रामसूकरः ।।
कर्दमस्तोमलिप्तांगः प्राप्तस्तत्र विशांपते ।। २७

आरावमथ शुश्राव तत्न्यग्रोधे मूषिका कृतम् ।।
तत्र हन्तु मुपक्रान्तं वनकाकं ददर्श च ।। २८

स तस्यालोकनादेव मूषिकाया ग्रामशूकरः ।।
परिशीलितया पूर्वं मूषिकाया विवशीकृतः ।। २९

यदभ्यस्तं भवेत्पूर्वं मनोवाक्कायकर्मभिः ।
भवान्तरसहस्त्रेऽपि राजंस्तन्नातिवर्तते ।। ३०

तमुवाच ततः कोलः काकोलं मांसलोलुपं ।
उच्चैर्मानुष्यवाचा च दयाधर्मार्थयुक्तया ।। ३१

-o-o-

ई बी १ चंचपुटेनचवै, ई बी २ वा, ई बी ३ ग्रोधेमु, ई बी ४ गंतु,
ई बी ५ मुपाक्रामनुवन, ई बी ६ तस्याक्लोक, ई बी ७ लत, ई बी ८ थ ।

-o-

(ए१) मूषाकीकृतं
(ए२) मानुष्ययावाचा

शूकर उवाच :- मुञ्च मूर्च दुराचार काक मूषाकबालिकाम् ।।
प्राणिनां वधकर्तारः सुखं विन्दन्ति नक्वचित् ।। ३२

व्यथा यथात्मनो देहे प्रहारैः काक जायते ।
तथा भवेत्परस्यापि को हिंसेत् प्राणिनस्ततः ।। ३३

उदकैकष्टकादस्मात् हिंस्त्राद्विरम कर्मणाः ।।
अस्या मांसेन तेमूढ तृप्तिनात्यैन्तिकी भवेत् ।। ३४

अन्यैरन्नादिभिरपि म्रियमाणस्य देहिनः ।।
न प्रशंसन्ति विद्वांसो मांसार्थे प्राणिनां वधम् ।। ३५

अस्थिरस्य शरीरस्य पुष्ट्यर्थे कः पुमानिह ।
हिंस्त्रेण कर्मणा काक हन्याल्लोकमिमं क्वचित् ।। ३६

कर्मोर्मिभिरसंख्येयैः कुर्वतोऽस्य गतागतम् ।
संसारे सुलभः कायः पुण्यमेकं हि दुर्लभम् ।। ३७

-o-

ई बी १ मूषिक , बी २ रैकाक्, ई बी ३ उदघुक्टुका, ई बी ४ नात्यंतिकीभवेत

श्लोक

कुर्वतो स्यगतागतं । संसारे सुलभः कायः पुण्यमेकंहिदुर्लभम् ।।
कृच्छ्राणियः ।।

(ए१) ड्
(ए२) हिस्त्रा
(ए३) म्री
(ए४) प्राणिनावधं

कृच्छ्राणि यः परस्यार्थं प्राप्नोति सुमहान्त्यपि ।
स्पृहयन्ति सदा[1] तस्मै साधवः सर्वदेहिनेः[2] ।। ३८

पापेन कर्मणा काक[3] काकत्वमभवत्तव ।
पुनः पापानि कुर्वाणो गन्ता नारकिणीं[4] गतिम् ।। ३९

धर्मशास्त्रार्थसंयुक्तमाकर्ण्य[5] वचनं मम ।
शुभेच्छा यदि ते[6] काक मुञ्चतत्मूषिका[ए१]मिमाम् ।। ४०

वायस उवाच :- मत्तो यः विहितः पूर्वमस्माकं[7] खलु वेधसा ।।
ग्रामशूकर जीवामो वयं तेनैव[ए२] नान्यथा ।। ४१

न तथा तृप्तिरस्माकं बलिभिर्गृहमेधिनाम् ।
पिशितेन यथा लोके स्वादितो[8] हन्मि मूषिकाम् ।। ४२

वसिष्ठ उवाच :- एवं विवदतोस्तत्र काकशूकरयोस्तयोः[9] ।।
उवाच मूषिका राजन् मन्दं मन्दं भयातुरा ।। ४३

---

बी १ सद, ई बी २ वेदनः, ई बी ३ कर्मणातावत्पापत्वमभवत्तव, ई बी ४ नरोहिणागतिं, ई बी ५ आ, ई बी ६ दिलेका, ई बी ७ अस्मांक, ई बी ८ स्यांदितो हन्मिभिक्षां, ई बी ९ व्यो ।

(ए१) मुषिका
(ए२) तेनवै

मूषाक्युवाच :- मुञ्च मां काक मा हिन्धिममुदान्तीमसून[1] स्वकं।
निर्विण्णास्मि भृशं पापादस्मान्मूषकजन्मन: ।। ४४

अस्मिन्नेव वरे तीर्थे कृष्णाख्ये दयिते शुभे ।।
त्यक्ष्याम्यहं न सन्देह: पापदग्धं कलेवरम्।। ४५

वसिष्ठ उवाच :- निशम्य वचनं राजन् तस्या वायसशूकरौ।
प्रागल्भमिव जल्पन्तीं विस्मयादिदमूचतु: ।। ४६

वायसशूकरावूचतु: मांषिकीं योनिमासाद्य तथा स्वल्पमिदं वय: ।
प्रगल्भं भाषमाणासि[2] ब्रूहि त्वं कासि कस्य वा ।। ४७

मूषाक्युवाच :- इतो[4] जन्मनि पूर्वेहमभूवं ब्राह्मणी शुभा ।।
कुलशीलसमाचारा भर्तु: शुश्रूषणे रता[1इ] ।। ४८

सा[ए2]कदाचिद्वयस्याभि: सम[5]मेकादशीदिने ।
गता देवं नमस्कर्तुमिह वाराहरूपिणम् ।। ४९

-०-०-

ई बी १ असून, ई बी २ जन्मना:, ई बी ३ तौ, ई बी ४ ततो
ई बी ५ समंरा, १ ई रता:

( ए १) हिंसि
(ए २ ) द्वयस्याभि:

सख्यस्ता विविधान् गन्धानाहृतान् हरिहेतवे ।
समर्प्य मम लीलाढ्यां वीक्षितुं नदीं ययुः ॥ ५०

गतासु तासु बालाद् दैवतार्थमुपाहृतम् ।
कर्पूरमहमेतस्या हृत्वा क्षिप्तवती मुखे ॥ ५१

तेन पापेन जातास्मि श्रीमालेऽत्र हि मूषिका ।
एतद्वां कथितं सर्वं पूर्वजन्मनि यत्कृतम् ॥ ५२

तावूचतुः: तथापि कर्मणा केनस्वजातिस्मरणं तव ।
मूषाकत्वेऽत्यपवित्रेऽपि जातं तद् ब्रूहि नौ शुभे ॥ ५३

मूषाक्युवाच :- पायसं मधुसंयुक्तं विप्रायात्मविदे पुरा ।
मया दत्तमिह व्यक्तं जाता जातिस्मृतिस्ततः ॥ ५४

-०-०-

ई बी १ तीर्थ
ई बी २ त्रैवे
ई बी ३ नौ
ई बी ४ पय
बी ५ मिदव्य
(ए १) हृतान्
(ए २) हत्वाक्षिपक्ती
(ए ३) वै
(ए ४) ब्रूहि
(ए ५) जातिस्मरा

वसिष्ठ उवाच :-तस्यास्तु वचनं श्रुत्वा विस्मितो[1] कौलवायसो ।
वायसोपि ततोऽमुञ्चन्मुण्डिकां जातकौतुक: ॥ ५५

सापि मुक्ताथ काकेन मुमूर्षस्तत्र पल्वले ।
पतनायोत्सुका राजन् वटशाखान्तमभ्यगात् ॥ ५६

एतस्मिन्नन्तरे राज्ञी शैब्या शतधनु:[3] प्रिया ॥
आगत्य प्रतिबोधाय काकीभूतस्य पण्डिता ॥ ५७

साहोवाच वरारोहा वायसं वटसंस्थितं[4]।
पश्यन्त्या: कृष्णसारसि मुण्डक्या:[ए१] शूकरस्य च ॥ ५८

शैब्योवाच :- स्मर्यतां तन्महाराज यत्कृतं पूर्वजन्मनि ॥
पाखण्डिनं समाभाष्य तीर्थस्नानादनन्तरं।। ५९

अशेषा भूभुत: पूर्वं[5] यत्र यस्मै बलिं ददु: ॥
स त्वं काकत्वमापन्नो जातोऽद्य बलिभुक् प्रभो ॥ ६०

-०-

ई बी १ लोकवायसो

ई बी २ जातु

ई बी ३ धनु

ई बी ४ संकटंगतं ई संवटंगतं ।

ई बी ५ पूर्वयस्मायास्मै

(ए१) मुण्डक्या:

वसिष्ठ उवाच :- इति संस्मारितो राजा काकत्वे प्रियया नृप[1] ।।
ध्यानार्पितमनस्तस्थौ[ए1] क्षणं जातस्मृतिर्नृपः[2] ।। ६१

पश्यतामथ सर्वेषां क्षणं ध्यात्वा नृपोत्तम ।।
निपपात जले तस्मिन्मुमुक्षुस्तत्कलेवरं ।। ६२

निमज्जतो जले तस्य वायसस्य विशांपते[3] ।
मृदंगघोषश्रवणाच्चक्रे[4] तारस्वरं शिखी[5] ।। ६३

तेन ध्यानं मयूरस्य प्राणान्ते नृपतेरभूत् ।।
अतः प्राप्तो मयूरत्वं राजा शतधनुस्तदा ।। ६४

सा चशैव्या सरस्तीरे जले दृष्ट्वा पतिं मृतं ।
आप्तैः संस्कारयामास चन्दनागुरुदारुभिः ।। ६५

गमनायमनो[6] राजंस्तस्या[ए2] दृष्ट्वा[7] बहुत्वरम् ।
उवाच विस्मितो दंष्ट्री[ए3] प्रश्रयान्मधुरं[8] वचः ।। ६६

-o-

ई बी १ गते,
ई बी २ प,
ई बी ३ वायसस्यशांव्यापतिं
ई बी ४ चुचक्रे
ई बी ५ शिवे
ई बी ६ संचार
ई बी ७ तो
बी ८ आसीत्तस्याबहुतंर
१ ई वचः

(ए१) स्तथौ ( ए २) स्तया (ए ३) दष्टी

शूकर उवाच :- यदि जानासि मे भीरु चरितं पूर्वजन्मनः ।।
तदाचक्ष्व विरक्तोऽस्मि जीवनात् शोकसंश्रयात् ।। ६७

किं मया न कृतं पूर्वं दानाध्ययनं तपः ।
येनाहं कुत्सितामेतां शौकरीं योनिमागतः ।। ६८

राज्ञी उवाच :- त्यक्तधर्मो भवानासीत् पाखण्डी पूर्वजन्मनि ।।
यस्यालापेन मे भर्ता क्रियोनिं प्राप्तवानहो ।। ६९

ये त्यजन्ति मद्धर्मं मोहाद्वालिशा हेतुवादिनः ।
प्रेत्यह पापिनो यान्ति नरास्ते नरकं ध्रुवम् ।। ७०

तस्मादेको भुवि स्वान्तस्तडागः कृष्णावल्लभः ।
एनमाश्रय नित्यं त्वं यदीच्छसि शुभां गतिम् ।। ७१

इत्याख्याय तदा राज्ञी निजं सा नगरं ययौ ।
विषादेन वराहोऽपि तत्र प्राणानमुंचत ।। ७२

-०-

ई बी १ वि
ई बी २ श्रि
बी ३ ध्ययनंतप
ई बी ४ सत्य
ई बी ५ सीपाबंडी
ई बी ६ लायाह्ममेभर्त्ता
ई बी ७ प्रेत्यमोघासिनोयांतिनरास्तं
ई बी ८ देष्णुभुवि
ई बी ९ भ

अथ सा मूषिका[ए१] राजन् प्राणाद[१] वीक्ष्य शूकरं।
परासुमुदकस्यान्ते जगाद मृशदुःखिता।। ७३

मृगव्युवाच :- अहो मम महत्कष्टं यदसौ ग्रामशूकरः ।।
मदर्थं सुप्रियान् प्राणान् परित्यजति दुःखितः ।। ७४

तन्मया किं विधेयं स्यादधुनास्य[२] हिताय वै ।
नाऽयं न च परो लोकः कृतघ्नस्य प्रशस्यते ।। ७५

परद्रोहरतानांहिपरद्रव्यहृतामपि[ए२] ।।
निःकृतिर्विहिता लोके कृतघ्ने नास्ति निःकृतिः ।। ७६

कामप्रदमिदं तीर्थं सदा संकीर्त्यते[३] बुधैः ।
तदिहास्योपकाराय करिष्ये देहसाधनं[४]।। ७७

वसिष्ठ उवाच :-इत्थं विलप्य बहुधा कृतज्ञा मूषिका नृप ।।
संवीक्षमाणोमार्तण्डमुवाचेदं[ए३] वचस्तदा ।। ७८

-o-

बी १ दांवी

बी २ धुनास्यातिायवै

इं बी ३ तीर्थमिथवाकीर्त्तिबुधैः

इं बी ४ नं

इं बी ५ उदीक्ष्यमाणा

(ए१) मूषकी

(ए२) हृतामपि

(ए३)णा

मूषाक्युवाच :- शृण्वन्तु देवता: सर्वास्तीर्थेऽस्मिन्निवसन्ति या: ।।
अयं च सात्पीलोकानांभगवान्कृष्णादीधितिः ।। ७९

अयं मत्प्राणनाथोऽस्तु यत्र तत्रापि शूकर: ।।
भवेयं प्राणदास्याहं यथासौ मम वायसात् ।। ८०

वसिष्ठ उवाच :- इत्थं विलप्य राजेन्द्र न्यग्रोधादपतज्जले ।
भक्षिता च समभ्येत्य परितो मत्स्यकच्छपै: ।। ८१

अवतीर्थप्रमावेण परित: पृथिवीभुज: ।।
गृहे जात:स राजाभूद्भलो नाम महाबल: ।। ८२

मूषिकासा च भार्या वै महिषी तस्यवल्लभा ।।
वामदेवात् परित्राता यथा किल स भूपति : ।। ८३

इत्थं ते कृष्णासरसो माहात्म्यं कथितं मया ।।
काकवाराहतां प्राप्तं यथापश्चान्नरेश्वर ।। ८४

य: पठेदिदमाख्यानं शृणुते वा समाहित: ।।
अहोरात्रकृतात्पापान्मुच्यते स न संशय: ।। ८५

-०-

इति श्री स्कंदपुराणे एकाशीतिसाहस्र्यां संहितायां ब्राह्मण्यविभागे तृतीय परिच्छेदे श्रीमालमहात्म्ये काकवाराह - माहात्म्यं नाम षोडशोऽध्याय: ।। १६ ।।

-०-

(ए१) वि

(ए२) मूषाकी